## समुद्राभ्राद् घः । (११८/३४६४)

समुद्रशब्दात् अभ्रशब्दाच्च घः प्रत्ययो भवति तत्र भवः इत्येतस्मि[1]न्नर्थे । यतोऽपवादः । 'समुद्रिया नदीनाम्' (ऋ. ७.८७.१) । 'अभ्रियस्येव घोषाः' (ऋ. १०.६८.१) । अभ्रशब्दस्यापूर्वनिपातः, [2]तस्य लक्षणस्य व्यभिचारित्वात् ॥

## बर्हिषि दत्तम् । (११९/३४६५)

भवः इति निवृत्तम् । बर्हिःशब्दात् सप्तमीसमर्थात् दत्तम् इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । 'बर्हिष्येषु निधिषु प्रियेषु (ऋ. १०.१५.५) ॥

## दूतस्य भागकर्मणी । (१२०/३४६६)

निर्देशादेव समर्थविभक्तिः । दूतशब्दात् षष्ठीसमर्थाद् भागे कर्मणि चाभिधेये यत् प्रत्ययो भवति । भागः अंशः । कर्म क्रिया । '[3]यदग्ने यासि दूत्यम्' (ऋ. १.१२.४) । [4]दूतभागः दूतकर्म वा ॥

## रक्षोयातूनां हननी । (१२१/३४६७)

निर्देशादेव समर्थविभक्तिः । रक्षःशब्दाद् यातुशब्दाच्च षष्ठीसमर्थाद् हननी इत्येतस्मिन्नर्थे [5]यत् प्रत्ययो भवति । हन्यते[6]ऽनया इति हननी । '[7]या वां मित्रावरुणौ रक्षस्या तनूः' (मै. २.३.१) 'यातव्या' (मै. २.३.१) । रक्षसां हननी । यातूनां हननी । बहुवचनं [8]स्तुतिवैशिष्ट्यज्ञापनार्थम् । बहूनां रक्षसां हननेन तनूः स्तूयते ॥

## रेवतीजगतीहविष्याभ्यः प्रशस्ये । (१२२/३४६८)

रेवत्यादिभ्यः [9]षष्ठीसमर्थेभ्यः प्रशस्ये वाच्ये यत् प्रत्ययो भवति । प्रशंसनं प्रशस्यम्, भावे[10]क्यप् प्रत्ययो भवति । 'यद्वो रेवती रेवत्यम्' (काठ. सं. १.८) । 'यद्वो जगती जगत्यम्' (काठ. सं. १.८) । 'यद्वो हविष्या हविष्यम्' (काठ. सं. १.८) । हविषे हिता हविष्याः, तासां [11]प्रशंसनं हविष्यम् । 'यस्येति च' (६.४.१४८/३११) इति लोपे कृते 'हलो यमां यमि लोपः' (८.४.६४/६०) इति लोपः ॥

## असुरस्य स्वम् । (१२३/३४६९)

असुरशब्दात् षष्ठीसमर्थात् स्वम् इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । अणोऽपवादः । 'असुर्यं वा एतत् पात्रं यत् कुलालकृतं चक्रवृत्तम् (मै.सं. १.८.३) ॥

---

1. विषये क. ई. 2. तल्लक्षणस्य ई, तस्य लक्षणव्यभिचारात् ड, निघातो लक्षणस्य व्यभिचार चिह्नम् ज. 3. अयं तेऽग्ने दूत्यम् ह, यत्तेऽग्ने दूत्यम् मुद्रितः पाठः ब. क. 4. दूतस्य भागः कर्म वा फ. 5. यत् नास्ति ब. 6. तया ब. 7. या ते अग्ने रक्षस्या तनूः मुद्रितः पाठः 8. तु वैशिष्टय° ड, स्तुतिवैशेष्य° क. 9. शब्देभ्यः इत्यधिकम् ब. क. ड. ई. फ. ह. 10. अयं इत्यधिकम् ड. 11. प्रशंसने ड. 12. यच्चक्रधृतं कुलालकतम् मुद्रित्तः पाठः ।